श्लेष्मकारित्वम् । वातपित्तनाशित्वम् । सस्नेहत्वम् । मधुरत्वम् । सारकत्वञ्च । इति भावप्रकाशः ॥ * ॥ तालशिरोगुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । मूत्रातङ्करोगनाशित्वम् । बलप्राणशुक्रवृद्धिकारित्वञ्च । इति । राजवल्लभः ॥ * ॥

गीतकालक्रियामानम् । अयं स्वर इयत् कालं गेयः इयत् कालं विलम्बितं इयत् कालं द्रुतं इयत् कालं मध्यमिति बोधयितुं ईडशैर्हस्तैरङ्गुल्याकुञ्चन प्रसारणादिक्रियाभिर्न्निर्णेतव्यं गातव्यञ्चेति कालक्रिययोः प्रमाणं तालः ॥ साङ्गे इदमियत् कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति ॥ कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियायाः परिस्पन्दात्मिकायाः परिच्छेदहेतुस्ताल इति मधुः ॥ कालेन नर्त्तनगलवादनक्रियाणां मानं तालः । तारादेककालमेषां विरामस्ताल इत्यन्ये । इत्यमरटीकायां भरतः ॥ * ॥ तस्योत्पत्तिर्यथा । गौरीहरयोर्नृत्येन तालो बभूव । तस्य कारणम् । क्रियाकालस्य । हरनृत्यस्य ताण्डवं गौर्य्या नृत्यस्य लास्यं इति संज्ञा अर्थात् पुरुषनृत्यस्य ताण्डवं नार्य्या नृत्यस्य लास्यमिति नाम । ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता । इति सङ्गीतशास्त्रम् ॥ * ॥ तस्य भेदा यथा,—

“चच्चत्पुटः१ चाचपुटः२ षट्पितापुत्त्रकस्तथा३ ।
उद्घट्टकः४ सन्निपातः५ कङ्कणः६ कोकिलारवः७ ॥
राजकोलाहलो८ रङ्गविद्याधरः९ शचीप्रियौ१० ।
पार्व्वतीलोचनो ११ राजचूडामणि १२ जयश्रियौ १३ ॥
वादकाकुल१४ कन्दर्प१५ नलकूवर१६ दर्पणाः१७ ।
रतिलीलो १८ मोक्षपतिः १९ श्रीरङ्गः २० सिंहविक्रमः २१ ॥
दीपको २२ मल्लिकामोदो २३ गजलीलश्च २४ चर्च्चरी २५ ।
कुहक्को २६ विजयानन्दो २७ वीरविक्रम २८ टेङ्किके २९ ॥
रङ्गाभरण ३० श्रीकीर्त्ति ३१ वनमालि ३२ चतुर्म्मुखाः ३३ ।
सिंहनन्दन ३४ नन्दीश ३५ चन्द्रबिम्ब ३६ द्वितीयकाः ३७ ॥
जयमङ्गल ३८ गन्धर्व्व ३९ मकरन्द ४० त्रिभङ्गयः ४१ ।
रतितालो ४२ वसन्तश्च ४३ जगझम्पो ४४ ऽथ गारुगिः ४५ ॥
कविशेखर ४६ घोषौ च ४७ हरवल्लभ ४८ भैरवौ ४९ ।
गतप्रत्यागतो ५० मल्लतालो ५१ भैरवमस्तकः ५२ ॥
सरस्वतीकण्ठाभरणः ५३ क्रीड़ा ५४ निःसारुरेव च ५५ ।
मुक्तावली ५६ रङ्गराज ५७ भरतानन्दा ५८ दितालकाः ५९ ॥
सम्पर्केष्टाक ६० इत्यादि ताला भरतसंमताः ।
संक्षेपतो निगदिता अथैषां लक्षणं यथा ॥ * ॥
अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम् ।
द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम् ॥
ताले चच्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुः प्लुतः १ ।
गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥ २ ॥
गलगालगलाश्चैव षट्पितापुत्त्रके मताः ३ ।
उद्घट्टके तु गमनाः ४ सन्निपाते गुरुर्म्मतः ॥५॥
चतुर्व्विधः परिज्ञेयस्तालः कङ्कणनामकः ६ ।
पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते ॥
लचतुष्कं गलौ पूर्णे खण्डे बिन्दुद्वयं गुरुः ।
यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत् ॥
खचतुष्कं सयत्यन्तं गुरुर्बिन्दुचतुष्टयम् ।
सयत्यन्तं लघुश्चैव तालोऽयं कोकिलारवः ॥७॥
लचतुष्कं सयत्यन्तं खत्रयं खचयं लघुः ।
लघुर्बिन्दुद्वयञ्चेति राजकोलाहलाभिधे ॥८॥
खद्वयं द्रौ प्लुतौ यत्र रङ्गविद्याधरः स तु ९ ।
लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै ॥
प्लुतद्वयञ्च यत्रास्ति स तालः स्याच्छचीप्रियः ॥१०॥
खद्वयं गुरुलौ बिन्दुर्गौ प्लुतौ गौ प्लुतौ पुनः ।
यत्र तालः स विज्ञेयः पार्व्वतीलोचनाभिधः ॥११॥
राजचूड़ामणौ बिन्दुर्लश्च बिन्दुर्लगौ मतौ ॥ १२ ॥
रगणो नो गुरुश्चैव जयश्रीरिति कथ्यते ॥ १३ ॥
प्लुतौ लघुचतुष्कञ्च मौ नौ द्रुतयुगं लघुः ।
लचतुष्कं विना शब्दं तालः स्याद्वादकाकुलः ॥१४॥
द्रुतद्वयं यकारश्च कन्दर्पेऽपि प्रकीर्त्तितः ॥ १५ ॥
चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि ।
लघ्वक्षराणि चत्वारि तालोऽयं नलकूवरः ॥१६॥
बिन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पणः ॥ १७ ॥
रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् ॥१८॥
आदौ षोड़शगुरवो द्वात्रिंशल्लघवस्ततः ।
चतुःषष्टिर्द्रुता यत्र सोऽयं मोक्षपतिर्म्मतः ॥ १९ ॥
श्रीरङ्गसंज्ञके ताले मगणाल्लघुप्लुतौ मतौ ॥ २० ॥
सिंहविक्रमताले तु मगणो नखगाः खगौ ॥२१॥
प्लुतो लघुः प्लुतश्चैव ताले दीपकनामनि ॥ २२ ॥
ताले स्यान्मल्लिकामोदे लद्वयं खचतुष्टयम् ॥२३॥
लचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम् ॥२४॥
अष्टकलस्तु चर्च्चर्य्यां विरामान्ते द्रुतौ लघुः ॥२५॥
द्रुतद्वन्द्वं भवेत्ताले कुहक्काख्ये लघुद्वयम् ॥२६॥
भवेद्विजयानन्दे लत्रयञ्च लघुत्रयम् ॥ २७ ॥
वीरविक्रमताले तु द्रुतौ लगौ ततः प्लुतः ॥ २८ ॥
टेङ्किका रगणेन स्यादेकेनैव कृतास्पदे ॥ २९ ॥
भगणो गप्लुतौ स्यातां रङ्गाभरणनामके ॥ ३० ॥
श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम् ॥३१॥
चतुर्द्रुता लघू द्वौ तु द्रुतो गो वनमालिनि ॥ ३२ ॥
चतुर्म्मुखाभिधे ताले यगणानन्तरं प्लुतः ॥ ३३ ॥
भगणः प्लुतो लगौ बिन्दुद्वयं गौ नः प्लुतस्तथा ।
लघुः प्लुतो द्रुतश्चैको लघुद्वयमथापि च ॥
निःशब्दं लचतुष्कञ्च ताले स्यात् सिंहनन्दने ॥३४॥
गो लघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरे मता ॥३५॥
गो द्रुतौ नौ प्लुतद्वन्द्वं चन्द्रबिम्बे प्रकीर्त्तितम् ॥३६॥
द्रुतद्वन्द्वं लघुश्चैकस्ताले स्यात्तु द्वितीयके ॥३७॥
सकारश्च यकारश्च जयमङ्गलनामनि ॥ ३८ ॥
चत्वारो गुरवो बिन्दुश्चत्वारश्च प्लुता अपि ।
बिन्दवो दशषट् लाश्च ताले गन्धर्व्वसंज्ञके ॥३९॥
मकरन्दे द्रुतद्वन्द्वं लघुद्वन्द्वमथो गुरुः ॥ ४० ॥
गुरुर्लघुः प्लुतश्चैव त्रिभङ्गिः परिकीर्त्तितः ॥४१॥
अत्र रतितालस्य लक्षणं पतितम् ॥ ४२ ॥
वसन्तताले कर्त्तव्यो नगणो मगनस्तथा ॥ ४३ ॥
जगझम्पे गुरुश्चैको विरामान्तश्च खद्वयम् ॥४४॥
गप्लुतौ लौ द्रुतौ लश्च प्लुतो गारुगि ॥ ४५ ।
शेखरे ॥ ४६ ॥
प्लुतः शून्ये नगौ लश्च खद्वयञ्च ततो लघुः ॥
खचतुष्कं विना शब्दं यत्र घोषः स उच्यते ।४७।
हरवल्लभताले च प्लुतौ लो गौ च खद्वम् ॥४८॥
भगणः प्लुतौ गनौ गयौ प्लुतो लघुश्च भैरवे ।४९।
गतप्रत्यागते ताले लो मौ गौ नौ प्रकीर्त्तितौ॥५०॥
चतुर्लघुर्म्मल्लताले विरामान्तं द्रुतद्वयम् ।
लगौ गौ नो नगौ गश्च खद्वयं लद्वयं पुनः ॥५१॥
नचतुष्कं विना शब्दं ताले भैरवमस्तके । ५२ ।
सरस्वतीकण्ठाभरणे गौ लघुश्च द्रुतद्वयम् ॥५३॥
एक एव प्लुतो यत्र क्रीड़ातालः स उच्यते ॥५४॥
द्रुतद्वयं विरामान्तं ताले निःसारुके मतम् ॥५५॥
खत्रयं सविरामान्तं नौ पुनः खत्रयन्तथा ॥
प्लुतौ गः खयुगं गश्च यत्र मुक्तावली तु सा ।५६।
लगौ बिन्दुयुगं गौ लो रङ्गराजे प्रकीर्त्तितः ॥५७॥
खद्वयं सविरामान्तं गुरुः प्लुतद्वयं लघुः ।
यत्र ताले स विज्ञेयो भरतानन्दसंज्ञकः ॥ ५८ ॥
आदिताले लघुश्चैक इत्याह भरतो मुनिः ॥५९।
मगणश्च प्लुतादन्तः संपर्केष्टाकतालके ॥ ६० ॥
एकाधिकशते ताले षण्मुखतमा इमे ॥”* ॥

अथ प्रस्तारः ।

“गुरुः प्लुताधोभागे तु गुर्व्वधोभागतो लघुः ।
द्रुतं लघोरधोभागे तुलेत् तुलया तु पङ्क्तिका ॥
उद्गृत्ता च कला पश्चादित्थं प्रस्तारणक्रमः ।
सर्व्वप्लुतात् समारभ्य मात्रानिवहनिर्म्मितात् ॥
तावत् प्रस्तारयेदन्ते यावत् सर्व्वं द्रुतं भवेत् ॥”

अत्र तालप्रस्तारे पिङ्गलवन्नष्टोद्दिष्टमेरुपताकादयः सन्ति बाहुल्यभयान्नोक्ताः ॥ * ॥

अथ प्लुतादिमात्राभेदेन तालघातनम् ।

“ताले निष्टातहस्तः प्लुतमनुघटयेद्घातमेकं सशब्दं
तत्पश्चात् द्वौ च घातौ निनदविरहितौ दर्शयेद्दूर्द्धतोऽधः ।
शून्यत्वात् फक्तालाविति जगति पुनः सूत्रसिद्धौ सनन्दावित्थं घातत्रयं तत् त्रिकलतनुवहिर्वर्द्धयेद्दुर्लकारम् ॥
एको घातः सशब्दो द्विकल इह गुरौ शब्दहीनस्तथान्यः
सोऽपूर्द्धं याति लीलावलयवलयितोत्तानहस्ताङ्गुलीभिः ।
किञ्चोच्चैकैकमात्रा समुदयिनि लघौ घात एको निनादी